# manobodhaH

# મનોબોધઃ

## Document Information

Text title : manobodhaH marAThI manAche shlokasya saMskRitAnuvAda

File name : manobodha-skt.itx

Category : raama, samartha-rAmadAsa

Location : doc_raama

Author : Swami Ramdas, translator Dasanudasa

Description-comments : in Sanskrit, verses addressed to/for mind

Latest update : October 21, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# મનોબોધઃ

॥ શ્રી રામ ॥

મનોબોધઃ

શ્રીરામદાસાનુદાસઃ

ગણેશોઽસ્તિ યઃ ષડ્ગુણૈશ્વર્યયુક્તઃ
તથા શારદા યા ચતુર્વાક્સ્વરૂપા ।
પ્રણમ્યાઽથ તૌ સૃષ્ટિનિર્માણમૂલં
અનન્તં હિતં રામમાર્ગં પ્રવક્ષ્યે ॥ ૧॥

મનો રામભક્તેઃ પથા યાસ્યસિ ત્વં
તદા શ્રીહરિં પ્રાપ્સ્યસે તં સ્વભાવાત્ ।
જનૈર્નિન્દિતં યત્ ત્વયા તન્ન કાર્યં
નરૈઃ શ્લાઘિતં કર્મ યત્નેન સેવ્યમ્ ॥ ૨॥

પ્રભાતે તુ યશ્ચિન્તયેદ્ રામચંદ્રં
તતઃ કીર્તયેત્ તદ્ગુણાંશ્ચારુવાચા ।
સદાચારમેનં ત્યજેન્નૈકચિત્તો
જગત્યાં સ એવાતિધન્યત્વમેતિ ॥ ૩॥

મનો વાસનાં દુઃખદાં સંત્યજાશુ
મનઃ સર્વદા પાપબુદ્ધિં જહીહિ ।
મનો મા ત્યજાઽજ્ઞાનતો ધર્મમાર્ગં
મનસ્તિષ્ઠ સત્સારભૂતે વિચારે ॥ ૪॥

મનઃ પાપકર્માદરસ્ત્યાજ્ય એવ
મનઃ સત્યસંકલ્પ એવાનુસેવ્યઃ ।
મનઃ કલ્પનાં મુઞ્ચ શબ્દાદિકાનાં
વિકારાશ્રયેણેહ ધિગ્ ધિક્ત્વમેતિ ॥ ૫॥

મનો માઽસ્તુ તે ક્લેશદઃ ક્રોધલેશો
મનો માઽસ્તુ કામો વિકારસ્ય મૂલમ્ ।
મનો મા મદં દુષ્ટમઙ્ગીકુરુ ત્વં
મનો માઽસ્તુ તે મત્સરો મા ચ દંભઃ ॥ ૬॥

મનો ધાર્યમાર્યેષુ માર્ગેષુ ધૈર્યં
મનો હીનપુંસો વચઃ ક્ષામ્યમેવ ।
મનોજ્ઞૈસ્ત્વયા શીતલૈર્વાક્પ્રબન્ધૈઃ
મનઃ સર્વદા સજ્જનાસ્તોષણીયાઃ ॥ ૭॥

મનો દેહપાતેઽપિ કીર્તિઃ સ્થિરા સ્યાદ્
યયા તાં ક્રિયાં સર્વદૈવાઽઽરભસ્વ ।
મનશ્ચાન્દનં સદ્ગુણં સમ્પ્રગુહ્ય
ત્વયા સર્વથા સજ્જનાઃ પ્રીણનીયાઃ ॥ ૮॥

મનઃ પારકીયં વનં મા ચિનુ ત્વમ્
અતિસ્વાર્થધીઃ શિષ્યતેઽત્રાતિપાપા ।
સદા પાપજન્યં ફલં ભોગ્યમેવ
યદા નેપ્સિતાઽઽપ્તિસ્તદા દુઃખમેવ ॥ ૯॥

મનો રામચન્દ્રે સદા પ્રીતિરસ્તુ
બલાદ્ હૃદ્ગતં દુઃખજાલં નિવાર્યમ્ ।
ત્વયા દેહદુઃખં સુખત્વેન માન્યં
રમસ્વાત્મરૂપે વિચારેણ નિત્યમ્ ॥ ૧૦॥

સમસ્તૈઃ સુખૈઃ સંયુતઃ કોઽસ્તિ લોકે
મનઃ સદ્વિચારૈઃ શનૈર્નિશ્ચિનુત્વમ્ ।
મનો યત્ ત્વયા સંચિતં કર્મ પૂર્વં
તદેવેહ ભોગ્યં શુભં વાઽશુભં વા ॥ ૧૧॥

મનો માઽન્તરં દુઃખજાલસ્ય દેહી
મનઃ સર્વથા શોકચિન્તે વિસર્જ ।
તતો દેહબુદ્ધિં વિવેકાદ્વિહાય
વિદેહસ્થિતૌ મુક્તિભાગ્ સંરમસ્વ ॥ ૧૨॥

મનો બ્રૂહિ તત્ ચેત્ શ્રુતં રાવણસ્ય
ક્ષણેનૈવ રાજ્યં સમસ્તં વિનિષ્ટમ્ ।

ત્યજાતોऽશુભાં વાસનં દુઃખદાત્રીં
બલેનૈતિ કાલો હઠાત્ પૃષ્ઠલગ્નઃ ॥ ૧૩॥

મનો દેહ એષોऽતિપુણ્યેન લબ્ધઃ
કૃતાન્તેન નીતઃ સ એવાન્તકાલે ।
મહાન્તોऽપિ વૈ મૃત્યુમાર્ગેણ યાતા
અસંખ્યેય-જીવા જનિં પ્રાપ્ય નષ્ટાઃ ॥ ૧૪॥

મનઃ પશ્ય યે સંસ્થિતા મૃત્યુભૂમૌ
વદન્ત્યામૃતિં તેऽહમેવાહમિત્થમ્ ।
ચિરં જીવિતં માનયન્ત્યાત્મનોऽજ્ઞાઃ
ક્ષણાત્ તે પરિત્યજ્ય સર્વં પ્રયાન્તિ ॥ ૧૫॥

મૃતં બન્ધુમાલોક્ય શોચત્યપાર્થઃ
ક્ષણાત્ સોऽપિ મૃત્યોઃ પથા સમ્પ્રયાતિ ।
યતોऽજ્ઞસ્ય નો યાતિ લોભઃ પ્રશાન્તિં
તતોऽસૌ પુનર્દેહયોગં પ્રયાતિ ॥ ૧૬॥

જનો મૂઢભાવેન શોચત્યપાર્થં
ક્ષણેનૈવ ભાવ્યં ભવત્યેવ નિત્યમ્ ।
ભવેત્ કર્મણા સ્વેન પુત્રાદિયોગો
વૃથા ખિદ્યતે તદ્વિયોગેऽલ્પબુદ્ધિઃ ॥ ૧૭॥

મનો ધારયાશાં સદા રાઘવસ્ય
તતોऽન્યં નરં નૈવ સંકીર્તય ત્વમ્ ।
પુરાણાનિ વેદાશ્ચ યં વર્ણયન્તિ
નરઃ શ્લાઘ્યતામેતિ તદ્વર્ણનેન ॥ ૧૮॥

મનો મા કદાપિ ત્યજ બ્રહ્મસત્યં
મનોऽસન્મતિં મા કૃથાઃ સર્વથૈવ ।
મનો બ્રૂહિ સત્યં સદા સદ્વિચોભિઃ
મનોऽસત્ ત્યજ પ્રાજ્ઞ મિથ્યેતિ મત્વા ॥ ૧૯॥

અતીવ શ્રમો જાયતે માતૃગર્ભે
મનસ્તન્ન કાર્યં યતો દુઃખભાક્ સ્યાત્ ।
શિશુઃ પચ્યતે જાઠરે વહ્નિકુણ્ડે
તદાऽધઃશિરાશ્ચોર્ધ્વપાત્ ચાતિખિન્નઃ ॥ ૨૦॥

મનો જન્મ-મૃત્યુ-પ્રદાં દુઃખદાત્રીં
ધનાઽઽપ્ત-પ્રિયા-કામનાં સંત્યજાશુ ।
યતો યાતના ગર્ભવાસેઽસ્ત્યસહ્યા
તતો રાઘવે પ્રીતિયોગં કુરુષ્વ ॥ ૨૧॥

મનો મે હિતં કાર્યમેતત્ ત્વયાઽદ્ય
સદા રામપાદૌ પ્રયત્નેન સેવ્યૌ ।
પ્રભુર્વાયુપુત્રસ્ય યઃ ખ્યાતકીર્તિઃ
જનાનુદ્ધરેત્ સ ત્રિલોકાધિનાથઃ ॥ ૨૨॥

મનો રામનામ્નસ્ત્વયાઽન્યન્ન વાચ્યં
વૃથા વાક્પ્રબન્ધાત્ સુખં નૈતિ કશ્ચિત્ ।
ક્ષણેનાયુરગ્રે હરત્યેવ કાલઃ
શરીરાવસાનેઽથ કો મોચયેત્ ત્વામ્ ॥ ૨૩॥

વિના રામસેવાં શ્રમો વ્યર્થ એવ
જનસ્ય પ્રલાપો યથા નિદ્રિતસ્ય ।
અતો બ્રૂહિ વાચા હરેર્નામ નિત્યં
અહંતાં મહાપાપિની સંહરાશુ ॥ ૨૪॥

મનસ્તે મદુક્તિર્હિતૈવેતિ માન્યા
ન ચેદ્ રામ-પાદાબ્જ-લબ્ધિઃ કુતસ્તે ।
સુખાપ્તિ-ક્ષણે જાયતે સૌખ્યમેવ
તતઃ સર્વનાશઃ સ્થિરં નૈવ કિંચિત્ ॥ ૨૫॥

કૃતઃ કેનચિદ્ દેહ-રક્ષા-પ્રયત્નઃ
સ દેહઃ ક્ષણેનૈવ કાલેન નીતઃ ।
અતસ્ત્વં મનો રામચંદ્રં ભજસ્વ
પ્રમુચ્યાન્તરાત્ સર્વચિન્તાં ભવસ્ય ॥ ૨૬॥

ભવસ્યાસ્ય ભીત્યા મનઃ કિં બિભેષિ
જહીમાં ધિયં ધૈર્યમેવાવલંબ્ય ।
પ્રભૌ રક્ષકે રામચન્દ્રે શિરઃસ્થે
ભયં કિં નુ તે દણ્ડહસ્તાત્ કૃતાન્તાત્ ॥ ૨૭॥

મનો દીનનાથં પ્રભું ચાપપાણિં

વિલોક્યાગ્રતઃ કમ્પતે કાલ એષઃ ।
જનૈર્મદ્વચઃ સત્યમેવેતિ માન્યં
સ નોપેક્ષતે રામચન્દ્રઃ સ્વભક્તમ્ ॥ ૨૮॥

વ્રતં રામચન્દ્રસ્ય તુ ખ્યાતમેતત્
સ્વભક્તદ્વિષો મસ્તકં તાડ્યમેવ ।
પુરી યેન નીતા ક્ષણાદ્ દેવલોકં
સ નોપેક્ષતે રામચન્દ્રઃ સ્વભક્તમ્ ॥ ૨૯॥

પ્રભોઃ સેવકં લોકયેત્ ક્રૂરદૃષ્ટ્યા
સ ઈદૃઉગ્વિધઃ કોઽસ્તિ ભૂમ્યામબુદ્ધિઃ ।
ત્રિલોક્યાં જના યદ્યશો વર્ણયન્તિ
સ નોપેક્ષતે રામચન્દ્રઃ સ્વભક્તમ્ ॥ ૩૦॥

મહા સંકટાન્મોચિતા યેન દેવાઃ
બલેન પ્રતાપૈર્ગુણૈર્યો વરિષ્ઠઃ ।
સ્મરત્યમ્બિકા શૂલપાણિસ્તથા યં
સ નોપેક્ષતે રામચન્દ્રઃ સ્વભક્તમ્ ॥ ૩૧॥

અહલ્યા શિલીભૂતદેહાઽપિ યેન
કૃતા પાદસંસ્પર્શતોઽતીવ પૂતા ।
શ્રુતિર્યદ્યશોવર્ણને મૌનમાપ
સ નોપેક્ષતે રામચન્દ્રઃ સ્વભક્તમ્ ॥ ૩૨॥

મનશ્ચંદ્ર-સૂર્યર્ક્ષમેર્વાદિકં તુ
વસત્યઞ્જસા યત્સ્વરૂપે સમસ્તમ્ ।
ચિરંજીવતાં યેન નીતૌ સ્વદાસૌ
સ નોપેક્ષતે રામચન્દ્રઃ સ્વભક્તમ્ ॥ ૩૩॥

ઉપેક્ષા ન કસ્યાપિ યસ્ય સ્વરૂપે
ઇતિ પ્રત્યયો નાસ્તિ મૂઢસ્ય ચિત્તે ।
પુરાણાનિ યં વિશ્વપાલં વદન્તિ
સ નોપેક્ષતે રામચન્દ્રઃ સ્વભક્તમ્ ॥ ૩૪॥

હૃદિ સ્વે સ્થિતો યાદૃશો યસ્ય ભાવો
વસત્યઞ્જસા તાદૃશસ્તત્ર દેવઃ ।
અનન્યસ્ય યો રક્ષકશ્ચાપપાણિઃ

સ નોપેક્ષતે રામચન્દ્રઃ સ્વભક્તમ્ ॥ ૩૫॥

હરિઃ પ્રાણિનાં સંનિધૌ સર્વદાऽऽસ્તે
કૃપાલુઃ સ્વભક્તસ્ય ધૈર્યં વિલોક્ય ।
સુખાનંદ-કૈવલ્ય-દાતાऽસ્તિ યો વૈ
સ નોપેક્ષતે રામચન્દ્રઃ સ્વભક્તમ્ ॥ ૩૬॥

યથા ભાસ્કરશ્ચક્રવાકસ્ય ગોપ્તા
તથા સંકટેऽસ્તિ પ્રભુઃ સેવકસ્ય ।
હરેર્ભક્તિમાહાત્મ્યમુદ્ગીયતે જ્ઞૈઃ
સ નોપેક્ષતે રામચન્દ્રઃ સ્વભક્તમ્ ॥ ૩૭॥

મનઃ પ્રાર્થનાં રે શ઼ૃણુ ત્વં મમૈકાં
રઘૂત્તંસરૂપં પ્રપશ્યાચલસ્ત્વમ્ ।
ઇદં મદ્વચસ્તે ન હેયં કદાપિ
મનો રાઘવે ત્વં નિવાસં કુરુષ્વ ॥ ૩૮॥

પુરાણાનિ વેદાશ્ચ યં વર્ણયન્તિ
સમાધાનતા સ્યાત્ સદા યસ્ય સઙ્ગાત્ ।
સમર્પ્યાશુ તસ્મિન્ નિજં ચઞ્ચલત્વં
મનો રાઘવે સંનિવાસં કુરુષ્વ ॥ ૩૯॥

મનઃ પ્રાપ્યતે વૈ સુખં યત્ર સર્વમ્
અતીવાદરેણેહ તલ્લક્ષિતવ્યમ્ ।
વિવેકેન દુષ્કલ્પનાં સંનિવાર્ય
મનો રાઘવે સંનિવાસં કુરુષ્વ ॥ ૪૦॥

સદૈવાટને નો સુખંકિંચિદસ્તિ
શ્રમો જાયતે નો હિતં કિંચિદેવ ।
વિવેકેન લબ્ધ્વા ઘનાનન્દ-બોધં
મનો રાઘવે સંનિવાસં કુરુષ્વ ॥ ૪૧॥

અલં વિસ્તરેણ બ્રવીમ્યેકમેવ
મનો રાઘવં ત્વં સ્વકીયં કુરુષ્વ ।
તદીયં વ્રતં દીનનાથેતિ શ્રુત્વા
મનઃ સજ્જન સ્વસ્વરૂપે વસ ત્વમ્ ॥ ૪૨॥

મનઃ સદ્વચો મે ત્વયા ગ્રાહ્યમેકં
હિતં કાર્યમેવાત્મનઃ સર્વથેતિ ।
કદાપ્યેહ રામેતરં નૈવ વાચ્યં
સદાઽઽત્મસ્વરૂપં નિદિધ્યાસનીયમ્ ॥ ૪૩॥

મનો મૂઢસઙ્ગે તુ મૌનં વિધેયં
કથાસ્વાદરો રાઘવસ્યૈવ કાર્યઃ ।
ન રામો ગૃહે યત્ર સંત્યજ્ય તત્તુ
સુખાર્થે સદાઽરણ્યવાસો વિધેયઃ ॥ ૪૪॥

સમાધાનભઙ્ગો ભવેદ્યસ્ય સઙ્ગાત્
અહંતા તથાઽઽકસ્મિકી સ્યાત્સ્વદેહે ।
મતિર્યસ્ય સઙ્ગાત્ ત્યજેદ્રામચન્દ્રં
તદીયેન સઙ્ગેન પુંસાં સુખં કિમ્ ॥ ૪૫॥

મનો યા ગતા રામહીના સ્વવેલા
તદાયુસ્ત્વયા નાશિતં બુદ્ધિજાડ્યાત્ ।
શ્રમો રામસેવાં વિના જીવિતં યત્
સ દક્ષોઽત્ર યો રામસેવી સદૈવ ॥ ૪૬॥

હૃદા ચિન્તયન્ લોચનાભ્યાં પ્રપશ્યન્
હરિં ભક્તિયુક્તો ય આસ્તે બુધોઽપિ ।
ગુણપ્રીતિયુક્તશ્ચરેત્ સાધનં યઃ
સ ધન્યોઽસ્તિ દાસોઽત્ર સર્વોત્તમસ્ય ॥ ૪૭॥

સદા દેવકાર્યે સ્વદેહં યુનક્તિ
સદા યસ્ય વાગ્ વક્તિ સદ્-રામનામ ।
વરિષ્ઠે સ્વધર્મે સ્થિતિર્યસ્ય નિત્યં
સ ધન્યોઽસ્તિ દાસોઽત્ર સર્વોત્તમસ્ય ॥ ૪૮॥

સદા વક્તિ યદ્ યાતિ માર્ગેણ તેન
પ્રપશ્યત્યનેકેષુ તો દેવમેકમ્ ।
ભ્રમસ્ય ક્ષયાદ્ યો ભજેદ્વાસુદેવં
સ ધન્યોઽસ્તિ દાસોઽત્ર સર્વોત્તમસ્ય ॥ ૪૯॥

વિકારા ન કામાદયો યસ્ય ચિત્તે
તપસ્વી વિરાગી સ્વયં બ્રહ્મચારી ।

સદા શાન્તચિત્તસ્તમોલેશહીનઃ
સ ધન્યોઽસ્તિ દાસોઽત્ર સર્વોત્તમસ્ય ॥ ૫૦॥

મદો મત્સરઃ સ્વાર્થબુદ્ધિર્નિરસ્તાઃ
પ્રપઞ્ચોદ્ભવો યસ્ય ચિત્તે ન ખેદઃ ।
સદા વક્તિ યઃ સૂનૃતામેવ વાચં
સ ધન્યોઽસ્તિ દાસોઽત્ર સર્વોત્તમસ્ય ॥ ૫૧॥

ક્રમેત્ તત્ત્વચિન્તાનુવાદેન કાલં
પ્રલિપ્તો ન દોષેણ દમ્ભાદિકેન ।
કરોત્યુત્તમૈઃ પ્રત્યહં બ્રહ્મવાદં
સ ધન્યોઽસ્તિ દાસોઽત્ર સર્વોત્તમસ્ય ॥ ૫૨॥

સદૈવાર્જવી સર્વલોકપ્રિયો યઃ
સદા સર્વદા સત્યવાદી વિવેકી ।
વચો ભાષતે નોઽનૃતં નો કદાચિત્
સ ધન્યોઽસ્તિ દાસોઽત્ર સર્વોત્તમસ્ય ॥ ૫૩॥

સદાઽરણ્યસંસ્થો ભવેદ્ યો યુવાઽપિ
વિકલ્પસ્ય ચિત્તે મલો નૈવ યસ્ય ।
દૃઢઃ પ્રત્યયો યસ્ય ચિત્તાન્ન યાતિ
સ ધન્યોઽસ્તિ દાસોઽત્ર સર્વોત્તમસ્ય ॥ ૫૪॥

દુરાશા ગતા યસ્ય ચિત્તાત્ સમૂલા
પ્રવૃધ્દા હરિ-પ્રેમરૂપા સુતૃષ્ણા ।
ઋણી દેવદેવઃ કૃતો યેન ભક્ત્યા
સ ધન્યોઽસ્તિ દાસોઽત્ર સર્વોત્તમસ્ય ॥ ૫૫॥

દયાલુઃ કૃપાલુશ્ચ યઃ કોમલાન્તો
જને સ્નેહયુક્તશ્ચ યો દાસ-પાલઃ ।
મનો યસ્ય ન ક્રોધ-સંતાપ-યુક્તં
સ ધન્યોઽસ્તિ દાસોઽત્ર સર્વોત્તમસ્ય ॥ ૫૬॥

હરેર્નામ-સંકીર્તનોપાસનાભ્યાં
જનો ધન્યતાં એત્યજસ્રં જગત્યામ્ ।
ઉદાસીનતા સા પદાર્થેષુ સારં
તયા સર્વદા ચિત્તવૃત્તેઃ પ્રશાન્તિઃ ॥ ૫૭॥

મનો માઽસ્તુ શબ્દાદિષુ પ્રીતિયોગઃ
પદાર્થેષુ કામો ભવેત્ પૂર્વપાપૈઃ ।
સુનિષ્કામ-ભક્ત્યા પ્રભુશ્ચિન્તનીયો
વિકલ્પસ્ય લેશોઽપિ તૂર્ણં પ્રહેયઃ ॥ ૫૮॥

જનઃ કલ્પનાં કલ્પયન્ કોટિકલ્પં
સમભ્યેતિ રામં પ્રભું નૈવ નૈવ ।
ધૃતશ્ચેતસા યેન કામો ન રામઃ
કુતસ્તસ્ય રામે તુ સુપ્રીતિયોગઃ ॥ ૫૯॥

મનો રામચન્દ્રો નિધિઃ કામધેનુઃ
સુરદ્રુર્મણિશ્ચિન્તિતાર્થપ્રદશ્ચ ।
પ્રભાવાદ્ હિ યસ્યૈવ સર્વસ્ય સત્તા
ન તત્તુલ્યતામેતિ કશ્ચિદ્ જગત્યામ્ ॥ ૬૦॥

સમાશ્રિત્ય કલ્પદ્રુમં દુઃખિતો યઃ
સદા તસ્ય ચિત્તે વસત્યેવ દુઃખમ્ ।
સમં સજ્જનૈર્યો વિવાદં કરોતિ
તતો યાતિ સંતાપમન્તર્મહાન્તમ્ ॥ ૬૧॥

ભવદ્વૈ નિદિધ્યાસ-ભઙ્ગોઽપિ તસ્ય
બલાદુદ્ભવેત્ શોક-સંતાપ-વૃત્તિઃ ।
સુખાનન્દ-નાશો ભવેદ્ ભેદબુદ્ધ્યા
મનોનિશ્ચયો લુપ્તતે હન્ત સર્વઃ ॥ ૬૨॥

યથા કામધેનુપ્રભોસ્તક્ર-યાચ્ઞા
તથૈવાત્મવેત્તુશ્ચ વાદપ્રિયત્વમ્ ।
સ સંત્યજ્ય ચિન્તામણિં કાચખણ્ડાન્
પ્રયાચેત તસ્મૈ ન કસ્તાન્ પ્રદદ્યાત્ ॥ ૬૩॥

દૃઢા નાસ્તિ બુદ્ધિર્વિમૂઢસ્ય પુંસો
ન ચિત્તેઽસ્તિ રામોઽતિકામાકુલસ્ય ।
પ્રવૃત્તેઽતિલાભે ભવેત્ ક્ષુબ્ધ-ચિત્તઃ
પ્રસક્તોઽતિભોગેષુ દૈન્યં પ્રયાતિ ॥ ૬૪॥

અભક્ત્યા હરી જીવિતં માઽસ્તુ દીનં

ભવેત્ ચાતિમૌઢ્યે સદા દુઃખદુઃખમ્ ।
મનો રામચન્દ્રેઽર્પય પ્રીતિયોગં
વિરામેષુ તે માસ્તુ વાઞ્છા ધનાદૌ ॥ ૬૫॥

અસારોઽસ્તિ સંસાર એષોઽતિઘોરો
મનઃ સજ્જનાન્વેષય ત્વં હિ સત્યમ્ ।
વિષં ભક્ષિતં ચેત્ સુખં તે કુતઃ સ્યાદ્
અતો રામચન્દ્રં સદા ચિન્તય ત્વમ્ ॥ ૬૬॥

ઘનશ્યામવર્ણોઽતિલાવણ્યયુક્તો
ગભીરોઽતિધીરઃ પ્રતાપેન પૂર્ણઃ ।
સ્વભક્તસ્ય યઃ સંકટે પક્ષપાતી
સ રામઃ પ્રભાતે હૃદા ચિન્તનીયઃ ॥ ૬૭॥

બલેનાધિકો રાઘવસ્ચાપપાણિઃ
કરાલસ્તુ કાલોઽપિ તસ્માદ્ બિભેતિ ।
કથા કૈવ મર્ત્યસ્ય રઙ્કસ્ય તત્ર
પ્રભાતે હૃદા રાઘવશ્ચિન્તનીયઃ ॥ ૬૮॥

સુખાનન્દકૃદ્ વારકો યો ભયસ્ય
સ હિ પ્રીતિયોગેન સેવ્યો જગત્યામ્ ।
વિવેકાદનાચારબુદ્ધિં વિસૃજ્ય
પ્રભાતે હૃદા રાઘવશ્ચિન્તનીયઃ ॥ ૬૯॥

મનઃ કીર્તય ત્વં હરિં કામપૂરં
ન વૈ બાધ્યસે દુઃખજાલૈઃ કદાપિ ।
મદાલસ્યમાશુ ત્વયા સમ્પ્રહેયં
પ્રભાતે હૃદા રાઘવશ્ચિન્તનીયઃ ॥ ૭૦॥

મહાદોષનાશોઽસ્તિ યત્કીર્તનેન
નરઃ સદ્ગતિં યાતિ યત્કીર્તનેન ।
ભવેત્ પુણ્યવૃદ્ધિશ્ચ યત્કીર્તનેન
સ રામઃ પ્રભાતે હૃદા ચિન્તનીયઃ ॥ ૭૧॥

ભવેન્ન વ્યયઃ સ્વીયવિત્તસ્ય કિંચિત્
તતોચ્ચારણે રામનામ્નો ન કષ્ટમ્ ।
ક્ષયો જાયતે યેન સંસારશત્રોઃ

સ રામઃ પ્રભાતે હૃદા ચિન્તનીયઃ ॥ ૭૨ ॥

મહદ્ દુઃખમુત્પદ્યતે દેહદણ્ડાત્
પરં નામસંકીર્તને નૈવ દુઃખમ્ ।
શિવશ્ચિન્તયત્યેવ યં દેવદેવં
સ રામઃ પ્રભાતે હૃદા ચિન્તનીયઃ ॥ ૭૩ ॥

તપઃપૂર્વકે સાધને દેહકષ્ટે
ધનેનૈવ દાનં વ્રતોદ્યાપનં ચ ।
કૃપાલુઃ સદા દીનજીવેષુ યોઽસૌ
પ્રભાતે હૃદા રાઘવશ્ચિન્તનીયઃ ॥ ૭૪ ॥

મનઃ સાધનેષ્વેતદેવ પ્રશસ્તં
ન ચેન્મન્યસે સાધુભિર્નિશ્ચિનુ ત્વમ્ ।
વૃથા સંશયસ્ત્યાજ્ય એવાન્તકારી
પ્રભાતે હૃદા રાઘવશ્ચિન્તનીયઃ ॥ ૭૫ ॥

ભવેન્નૈવ યોગો ન ધર્મો ન કર્મ
ન ભોગો ન ચ ત્યાગ એકોઽપિ સાઙ્ગઃ ।
મનો નામ-સંકીર્તને શ્રદ્ધસ્વ
પ્રભાતે હૃદા રાઘવશ્ચિન્તનીયઃ ॥ ૭૬ ॥

હરેર્નામ સંકીર્તને શ્રદ્ધાનો
ભવેદ્ દ્વન્દ્વશૂન્યોજપન્ રામનામ ।
હરેઃ કર્મ કુર્વન્ ભવિષ્યત્યકામો
સ્વરૂપં ચ સર્વત્ર પશ્યેત્ તદાનીમ્ ॥ ૭૭ ॥

અહો યસ્ય રામે ન વિશ્વસ્તબુદ્ધિઃ
ભવેત્ પામરઃ સર્વદા દુઃખભાક્ સઃ ।
સ્થિતે કિન્તુ કૈવલ્યદે રામચન્દ્રે
વૃથા દેહ-સંસાર-ચિન્તાઽલ્પબુદ્ધેઃ ॥ ૭૮ ॥

મનઃ પાવનાં ભાવનાં રાઘવસ્ય
નિધેહ્યન્તરે માઽસ્તુ સંસારચિન્તા ।
ભવો ભ્રામયત્યેવ જીવં સદૈવ
અસદ્-વસ્તુ-સંધારણં વ્યર્થમેવ ॥ ૭૯ ॥

મનઃ સંશ્રય શ્રીશમીશસ્ય હૃત્સ્થં

તરાદ્યૈવ દુષ્પાર-સંસાર-વાર્ધિમ્ ।
પ્રહેયસ્ત્વયા દુર્ભરઃ કામ એષઃ
ખરો મત્સરઃ સર્વથા દણ્ડ્ય એવ ॥ ૮૦॥

મનો મત્સરાત્ મા ત્યજ શ્રીશનામ
નિદિધ્યાસ એષોઽસ્ત્વતીવાદરાત્ તે ।
મનો રામનામોત્તમં સાધનં રે
ન ચૈતસ્ય તુલ્યં કિમપ્યસ્તિ લોકે ॥ ૮૧॥

બહૂન્યન્યનામાનિ તુલ્યાનિ નાસ્યેતિ
અભાગ્યાન્ન જાનાત્યયં પામરોઽજ્ઞઃ ।
ઇદં પાર્વતીશેન બુદ્ધં વિષઘ્નં
કથા માનવસ્યાત્ર કા કિંકરસ્ય ॥ ૮૨॥

સ્મરારીઃ સદા ધ્યાયતીશં હિ રામં
ઉમાસંયુતો ગાયતિ પ્રેમબદ્ધઃ ।
દૃઢ-જ્ઞાન-વૈરાગ્ય-સામર્થ્ય-યુક્તઃ
સદાઽઽસ્તે સુખં રામ-વિશ્વાસ-પૂર્ણઃ ॥ ૮૩॥

શિરઃસંસ્થિતો યઃ પ્રભુર્વિઠ્ઠલસ્ય
શિવઃ સોઽપિ તદ્ધ્યાન-મગ્નો ન કિં ત્વમ્ ।
યતો નીલકણ્ઠોઽપિ  શાન્તિં પ્રપેદે
સ રામઃ કૃતાન્તાન્નરં મોચયેદ્ વૈ ॥ ૮૪॥

ભજેદ્ રાઘવં યોગિ-વિશ્રાન્તિ-હેતું
જપત્યસ્ય નામાનિ ગૌર્યા મહેશઃ ।
તપસ્વી સ્વયં શંકરઃ શાન્ત આસીદ્
ભવેન્મુક્તિદોઽન્તે હ્યસૌ રામ એકઃ ॥ ૮૫॥

મુખે યસ્ય રામઃ સુખં તસ્ય નિત્યં
સદાનન્દરૂપે નિમગ્નઃ સ આસ્તે ।
વિના રામમન્યત્ર સંદેહખેદૌ
નિજં ધામ નામૈવ શોકાપહારિ ॥ ૮૬॥

મુખે યસ્ય રામો ન કામોઽસ્તિ ચિત્તે

ન તદ્-ધૈર્યલોપો ભવેત્ સંકટેષુ ।
હરેર્ભક્તિયોગેન કામં વિજિત્ય
સ ધન્યોઽભવદ્ મારુતિબ્રહ્મચારી ॥ ૮૭॥

અતીવોત્તમં સુન્દરં સ્વલ્પવર્ણં
અમૂલ્યં સુલભ્યં હિતં રામનામ ।
જનૈઃ કીર્ત્યમાનં ભવધ્વંસકં યત્
તદેવેહ કૈવલ્યરૂપં નરાણામ્ ॥ ૮૮॥

સદા ભોજનાદૌ વદેદ્ રામનામ
તતો ભોજને સાદરં ઘોષણીયમ્ ।
પ્રતિગ્રાસમેવં વદેન્નામ પુણ્યં
તદા પ્રાપ્યતે શ્રીહરિઃ સ સ્વભાવાત્ ॥ ૮૯॥

સદા નામહીનસ્ય ઘોરાઽસ્તિ હાનિઃ
ન યસ્યાદરો નામ્નિ તજ્જન્મ તુચ્છમ્ ।
હરેર્નામ વેદેષુ શાસ્ત્રેષુ શ્રેય-
સ્કરંવૈ પરં ખ્યાપિતં વ્યાસવાણ્યા ॥ ૯૦॥

મનો રામચન્દ્રે ન કાર્યા ઉપેક્ષા
હરેર્નામ સંકીર્તયેદાદરેણ ।
ન કિંચિદ્વ્યયઃ કીર્તને રામનામ્નઃ
તતો ઘોષયેજ્જાનકીશસ્ય નામ ॥ ૯૧॥

સસત્કારમુદ્ઘોષિતે રામનામે
સુદૂરં સ્વહૃત્સ્થાશ્ચ દોષાઃ પ્રયાન્તિ ।
હરિસ્તિષ્ઠતિ પ્રીત આકર્ણ્ય કીર્તિં
અતઃ શ્રીશિવો રામનામૈકતન્દ્રઃ ॥ ૯૨॥

પ્રભુર્યોઽન્નદઃ સ્વૈરમાકીટકેભ્યઃ
સદા હૃદ્ગતા યસ્ય ચિન્તા જનાનામ્ ।
સુલભ્યેઽપિ તન્નામસંકીર્તને તે
મનો હીયતે કિં નુ તન્મે વદાશુ ॥ ૯૩॥

ત્રિલોકી-વિદાહે ક્ષમો યોઽસ્તિ રુષ્ટઃ
સ ઈશઃ શમં પ્રાપ યત્કીર્તનેન ।
જપત્યાદરાધત્ શિવા વિશ્વમાતા

તદેવેહ સર્વૈર્જનૈજ઼્ કીર્તનીયમ્ ॥ ૯૪॥

મનોઽજામિલો દુષ્કૃતી પુત્રનામ
ગુણન્નેવ નારાયણેત્યાપ મુક્તિમ્ ।
શુકં કુટ્ટિની રાઘવેત્યાહ્વયન્તી
પુરાણપ્રસિદ્ધાં સુવિખ્યાતિમાપ ॥ ૯૫॥

સ્વભક્તોત્તમો દૈત્યવંશેઽપિ જાતઃ
પ્રહ્લાદનામાઽજપન્નામ નિત્યમ્ ।
પિતા તસ્ય  તન્નૈવ સેહે દુરાત્મા
જગત્યાં સ નૈવાજપદ્ રામનામ ॥ ૯૬॥

ન યદ્વાચિ રામઃ કથં તસ્ય મુક્તિઃ
અહંતાવશો યાતનાં યાતિ વ્યર્થમ્ ।
તતો દેહનાશે મહાદુઃખમેતીતિ
યતો બ્રૂત રે રામરામેતિ નિત્યમ્ ॥ ૯૭॥

સ્ફુટં તારિતાઃ પ્રસ્તરા રામનામ્ના
જડા માનવાસ્તાતિતા નૈકશોઽત્ર ।
પરં સંશયાત્મા સદા તત્પ્રભાવે
જપેન્નૈવ યઃ સોઽસ્તિ ના પાપરૂપઃ ॥ ૯૮॥

જગત્યાં હિ વારાણસી પુણ્યભૂમિઃ
જના યત્ર યાતાઃ પિતૄનુદ્ધરન્તિ ।
સદા ચન્દ્રમૌલિર્ગુણન્ રામનામ
સ્થિતસ્તત્ર જીવાન્ સમુદ્બોધનાર્થમ્ ॥ ૯૯॥

નૃભિઃ કર્મ કર્તું ન શક્યં યથાવત્
કૃતે ધર્મકૃત્યેઽપિ નો પુણ્યલાભઃ ।
દયા સર્વભૂતેષુ નૈવાસ્તિ ચિત્તે
અમૂલ્યં હરેર્નામ નો હન્ત વક્ત્રે ॥ ૧૦૦॥

ન યસ્ય પ્રિયં નામ તં શાસ્તિ કાલો
વિકલ્પાત્ કુતર્કે ગતિર્નારકી સ્યાત્ ।
અતઃ સાદરં નામ સંકીર્તિતવ્યં
તતો જાયતે દોષનાશઃ સ્વભાવાત્ ॥ ૧૦૧॥

પ્રકૃત્યોરરીકૃત્ય નમ્રત્વમેવ
મનઃ સજ્જનાસ્તેન સંતોષિતવ્યાઃ ।
સ્વદેહં ચ લોકોપકાર્યે નિયુજ્ય
ભજાતિપ્રમોદેન સાકારમીશમ્ ॥ ૧૦૨॥

હરેઃ કીર્તને તદ્ગુણપ્રીતિરસ્તુ
પરબ્રહ્મબોધે ત્વહંતા ચ માઽસ્તુ ।
ધને ચાન્યદીયે તથાઽન્યપ્રિયાયાં
નિરૂઢોઽભિમાનઃ પરિત્યાજ્ય એવ ॥ ૧૦૩॥

યથા વક્તિ તદ્વન્ન યસ્ય પ્રવૃત્તિઃ
વિમૂઢઃ સ તેનૈવ લજ્જામુપૈતિ ।
મનઃ કેવલં યસ્ય વાગ્વિભ્રમોઅઽસ્તિ
કથં પ્રાપ્નુયાદ્ દેવદેવં સ મૂઢઃ ॥ ૧૦૪॥

વિવેકાદશુદ્ધાં ક્રિયાં સ્વાં વિહાય
વિશુદ્ધાં ક્રિયામાદરેણાઽઽચર ત્વમ્ ।
યથા ભાષસે તદ્વદેવાચર ત્વં
મનઃ કલ્પનાં મુઞ્ચ સંસારદાત્રીમ્ ॥ ૧૦૫॥

સમાચર્ય સંધ્યાદિ નિત્યં સ્વકર્મ
વિવેકાન્મનઃ સ્થાપયાત્મપ્રભ્રષ્ટમ્ ।
દયા સર્વભૂતેષુ યસ્ય પ્રવૃદ્ધા
સદા ભક્તિભાવાત્ સ આપ્નોતિ શાન્તિમ્ ॥ ૧૦૬॥

મનો નૈવ કાર્યઃ પ્રકોપઃ કદાચિત્
મનઃ સાધુસઙ્ગે પ્રવૃત્તિં કુરુષ્વ ।
મનો મુઞ્ચ સઙ્ગં સદા દુર્જનાનાં
મનસ્તેન તે મોક્ષલાભોઽસ્તિ સત્યમ્ ॥ ૧૦૭॥

મનઃ સર્વદા સાધુસઙ્ગેન પુંસાં
ભવેદ્ વિક્રિયાહાનિરીશે ચ ભક્તિઃ ।
વિના સત્ક્રિયાં માસ્તુ વાચાલતા તે
યતો વાદહાનિઃ સ સંવાદ ઇષ્ટઃ ॥ ૧૦૮॥

વિતણ્ડઃ સદા ત્યાજ્ય એવાત્ર સર્વૈઃ
સુખેનોત્તમૈઃ સદ્વિવાદો વિધેયઃ ।

સુસંવાદ એવેહ શોકોપહારી
યતો વાદહાનિઃ સ સંવાદ ઇષ્ટઃ ॥ ૧૦૯॥

અસદ્વાદહા યઃ સ સંવાદ એવ
વિવેકેન જેતવ્ય એવાભિમાનઃ ।
અહંતા હિ વાદે વિકારાન્ કરોતિ
યતો વાદહાનિઃ સ સંવાદ ઇષ્ટઃ ॥ ૧૧૦॥

હિતાયૈવ તે સત્યવાગીરિતેયં
હિતાયાત્મનસ્ત્વં વિચાર્યાચરાત્ર ।
હિતાયૈવ પાખણ્ડબુદ્ધિર્વિવર્જ્યા
યતો વાદહાનિઃ સ સંવાદ ઇષ્ટઃ ॥ ૧૧૧॥

ગતં જન્મ વક્તુસ્તથા શ્રોતુરેવ
વિવાદઃ પરં નૈવ શાન્તો જનેષુ ।
વિવાદોદ્ભવઃ સંશયો દમ્ભકારી
યતો વાદહાનિઃ સ સંવાદ ઇષ્ટઃ ॥ ૧૧૨॥

હિતં વિસ્મૃતં પણ્ડિતૈર્વાદશૌણ્ડૈઃ
અહંતાબલાદ્ રાક્ષસત્વં ગતાસ્તે ।
પરેશાદ્વિના પણ્ડિતો નાસ્તિ કશ્ચિદ્
અતો હે મનસ્ત્વં ત્યજ સ્વામહંતામ્ ॥ ૧૧૩॥

પરાયોપદેશે વ્યયો નૈવ કશ્ચિદ્
વૃથાઽનુક્ષણં વર્ધતે ગર્વવેગઃ ।
ક્રિયામન્તરા વાક્પટુત્વં ધિગેવ
મનઃ સર્વથૈવાદરાન્નિશ્ચિનુ ત્વમ્ ॥ ૧૧૪॥

ન યો વાદભાક્ સંવદેત્ તેન પુંસાં
વિવેકાદહંકારલેશોઽપિ હેયઃ ।
વદેદ્યત્ તદેવાચરેત્ સર્વથૈવ
વિશુદ્ધક્રિયો ભક્તિમાર્ગેણ ગચ્છેત્ ॥ ૧૧૫॥

મુનેઃ શાપજં ગર્ભવાસસ્ય દુઃખં
સ્વયં યોઽમ્બરીષસ્ય જગ્રાહ વિષ્ણુઃ ।
દદૌ ચોપમન્યું શિવઃ ક્ષીરસિન્ધું
સ નોપેક્ષતે દેવદેવઃ સ્વભક્તમ્ ॥ ૧૧૬॥

ધ્રુવં બાલમજ્ઞં તથા દૈન્યભાજં
પરં ધ્યાનનિષ્ઠં વિલોક્યાનુકમ્પ્ય ।
ચકારાચલં યસ્તુ તારાઙ્ગણે તં
સ નોપેક્ષતે દેવદેવઃ સ્વભક્તમ્ ॥ ૧૧૭॥

ગજેન્દ્રઃ સરસ્યુગ્રનક્રેણ પાદે
ધૃતો વિષ્ણુમેવાસ્મરત્ ખિન્નગાત્રઃ ।
હરિસ્તત્ક્ષણદેત્ય યોઽમોચયત્તં
સ નોપેક્ષતે દેવદેવઃ સ્વભક્તમ્ ॥ ૧૧૮॥

દ્વિજોઽજામિલઃ પાપકર્માઽન્તકાલે
વદન્ પુત્રનામ પ્રપેદે વિમુક્તિમ્ ।
અનાથસ્ય યોઽસ્ત્યાશ્રયશ્ચક્રપાણિઃ
સ નોપેક્ષતે દેવદેવઃ સ્વભક્તમ્ ॥ ૧૧૯॥

વિધાતુર્હિતાયાભવત્ મત્સ્યરૂપો
દધારાચલાં કૂર્મરૂપેણ પૃષ્ઠે ।
સ્વભક્તાન્ હિ પાતું શ્રિતો નીચયોનીઃ
સ નોપેક્ષતે દેવદેવઃ સ્વભક્તમ્ ॥ ૧૨૦॥

મહાભક્ત-પ્રહ્લાદ-સંરક્ષણાર્થં
નૃસિંહસ્વરૂપં પ્રપેદે ય ઉગ્રમ્ ।
ન યત્સંન્નિધૌ કોઽપિ ગન્તું સમર્થઃ
સ નોપેક્ષતે દેવદેવઃ સ્વભક્તમ્ ॥ ૧૨૧॥

યયાચે કૃપાં વજ્રપાણિર્યદા વૈ
તદા વામનોઽભૂત્ સ્વયં ચક્રપાણિઃ ।
તથા ભાર્ગવો યો દ્વિજાર્થં બભૂવ
સ નોપેક્ષતે દેવદેવઃ સ્વભક્તમ્ ॥ ૧૨૨॥

અહલ્યા-સતી-પક્ષપાતાદરણ્યં
સિષેવેઽપિ દેવાંશ્ચ બન્ધાદ્વિમોક્તુમ્ ।
રિપોર્યો ધ્વજં પ્રાહરદ્ રાવણસ્ય
સ નોપેક્ષતે દેવદેવઃ સ્વભક્તમ્ ॥ ૧૨૩॥

પુરા દ્રૌપદી-પ્રીતયે દેવદેવઃ

સ્વયં તત્ક્ષણાદેવ તત્રાऽऽવિરાસીત્ ।
કલૌ યોऽભવન્મૌનિ-બુદ્ધસ્તથૈવ
સ નોપેક્ષતે દેવદેવઃ સ્વભક્તમ્ ॥ ૧૨૪॥

અનાથાન્ સ્વભક્તાન્ પરિત્રાતુમેવ
કલૌ સંભવિષ્યત્યસાવેવ કલ્કિઃ ।
શ્રુતિર્યદ્ગુણખ્યાપને મૌનમાપ
સ નોપેક્ષતે દેવદેવઃ સ્વભક્તમ્ ॥ ૧૨૫॥

જનાનુગ્રહાર્થં હિ લીલાવતારા
અનેકા ધૃતા યેન પૂર્વં ધરણ્યામ્ ।
ન તં સેવતે યઃ સ એવાતિપાપો
દુરાત્મા કુબુદ્ધિઃ સ ચાણ્ડાલરૂપઃ ॥ ૧૨૬॥

સ ધન્યો હરેર્નામઘોષેણ શાન્તઃ
તથાऽऽકર્ણ્ય યસ્તત્કથાં તત્ર લીનઃ ।
પ્રનષ્ટા કુબુદ્ધિસ્તદીયા સ્વબોધાદ્
મનોવાસના યસ્ય રામે વિલીના ॥ ૧૨૭॥

મનો વાસના વાસુદેવે તવાસ્તુ
મનઃ કામના કામસઙ્ગે તુ માऽસ્તુ ।
મનઃ કલ્પના તે વૃથા નૈવ કાર્યા
મનઃ સજ્જન ! સન્ત-સઙ્ગે રમસ્વ ॥ ૧૨૮॥

મનઃ સદ્ગતિ-પ્રાપ્તયે સાધુસઙ્ગઃ
તતો નશ્યતે દુર્મતિર્દુર્જનસ્ય ।
રતીશો મનઃક્ષોભકોऽસ્તીતિ મત્વા
વિધેયઃ પ્રયત્નો બુધૈર્નિર્મમત્વે ॥ ૧૨૯॥

મનો માऽસ્તુ રામં વિના તે વિકલ્પઃ
સદા સત્યસંકલ્પ એવાऽસ્તુ ચિત્તે ।
પરિત્યજ્ય જલ્પં ચ લોકે સદા ત્વં
રમાકાન્તમેકાન્તવૃત્યા ભજસ્વ ॥ ૧૩૦॥

જગત્યાં જનૈઃ સેવ્ય એકો હિ રામઃ
સ ત્વેકવાગેકબાણસ્તથૈવ ।
ચરિત્રં યદીયં જનોદ્ધારકં ચ

સ સીતાપતિઃ સેવ્ય આદૌ વિવેકાત્ ॥ ૧૩૧॥

વિચાર્યૈવ યો ભાષતે વર્તતે વા
તદીયેન સઙ્ગેન સંતાપ-શાન્તિઃ ।
પ્રવાચ્યં વિચારં વિના નૈવ કિંચિત્
સદા સત્પથા ચ પ્રયાતવ્યમેવ ॥ ૧૩૨॥

વિરક્તિશ્ચ ભક્તિશ્ચ વિજ્ઞાનયોગઃ
સદાઽઽત્માનુબોધો દૃઢો યદ્-હૃદિર્હિ ।
સદા દર્શનં સ્પર્શનં તસ્ય પુણ્યં
તથા ભાષણં નાશકં સંશયસ્ય ॥ ૧૩૩॥

ન યસ્યાસ્તિ ગર્વો સદા વીતરાગઃ
ક્ષમાશાન્તિયુક્તો દયાયાં ચ દક્ષઃ ।
નહિ ક્ષોભલોભૌ ન દૈન્યં ચ યસ્મિન્
વસત્યગ્જસા તત્ર યોગીશ્વરત્વમ્ ॥ ૧૩૪॥

વિધેયા મનઃ સંગતિઃ સજ્જનસ્ય
યતો દુર્જનસ્યાપિ ધીઃ શુદ્ધિમેતિ ।
સુસદ્ભાવ-સદ્બુદ્ધિ-સન્માર્ગલાભઃ
તતો નિર્ભયત્વં કરાલાચ્છ કાલાત્ ॥ ૧૩૫॥

સદા ભીતિયુક્તં હિ બ્રહ્માણ્ડમેતદ્
અનન્તં તુ તત્ સાધવશ્ચાભયા વૈ ।
ભવેદ્ યસ્ય તદ્-જ્ઞાનતો દ્વૈતહાનિઃ
ભયં માનસાત્ સર્વથા તસ્ય નષ્ટમ્ ॥ ૧૩૬॥

પ્રબોધ્યેહ જીવં પ્રયાતા હિ શ્રેષ્ઠાઃ
તથાપ્યજ્ઞ એવેહ જીવોઽસ્તિ હન્ત ।
લયં યસ્ય નો યાત્યહંકાર-કર્મ
ન સ જ્ઞાનધિં વિન્દતેઽહંતયા વૈ ॥ ૧૩૭॥

ભ્રમાત્ ચિદ્-ધનં યસ્ય ગુપ્તં બભુવ
મૃતિર્જન્મદારિદ્ર્યમાવિર્બભૂવ ।
વિલીના ન યસ્યેહ દેહાત્મબુદ્ધિઃ
ન સ જ્ઞાનધિં વિન્દતેઽહંતયા વૈ ॥ ૧૩૮॥

ન વેત્ત્યાત્મતત્ત્વં તતં સર્વતોऽપિ
જડં મન્યતે હન્ત દૃશ્યં હ્યભાગ્યઃ ।
ન ચાશ્રદ્ધયા પુણ્યલેશોऽપિ યસ્ય
ન સ જ્ઞાનધિં વિન્દતેऽહંતયા વૈ ॥ ૧૩૯॥

નિજં વસ્તુ ન પ્રાપ્યતે સ્વપ્રમાદાત્
ગુણાનં હિ બન્ધોऽત્ર દુઃખસ્ય હેતુઃ ।
ભવન્નૈવ યાવદ્ ગુણાતીતવૃત્તિઃ
નિધિર્વિદ્યતેऽહંતયા નૈવ તાવત્ ॥ ૧૪૦॥ ??સ્તર્ત્ નેવ્
અથહાસ્તિ તો બ્રહ્મવિત્ તસ્ય સેવા
તથા વન્દનીયં તદીયાઙ્ઘ્રિયુગ્મમ્ ।
વિના સદ્ગુરોરઞ્જનં તન્ન વેદ્યં
મનોऽહંતયાऽસૌ નિધિર્નૈવ લભ્યઃ ॥ ૧૪૧॥

ન તદ્ જ્ઞાયતે જ્ઞાયતે નૈવ યાવદ્
વિમૂઢસ્ય સંદેહ-હાનિર્ન ભૂયાત્ ।
અહંતા ન યાવદ્ વિનિર્યાતિ તાવદ્
બલાન્નૈવ તદ્ વિદ્યતે લભ્યતે ન ॥ ૧૪૨॥

અવિદ્યાવશો માનવો મૂઢબુદ્ધિઃ
ભ્રમાદ્ વિસ્મૃતં સ્વં હિતં નોપયાતિ ।
યથાऽસમ્પરીક્ષ્યાદૃતં કિન્ત્વશુદ્ધં
ન તન્નાણકં સ્વેપ્સિતાર્થક્રયાર્થમ્ ॥ ૧૪૩॥

જગત્યાં મનઃ કિં નુ સત્યં યથાર્થં
ત્વયા સાદરં તત્તુ સંશોધનીયમ્ ।
તથા કુર્વતા બ્રહ્મ-સત્તાનુભૂતિઃ
તતોऽજ્ઞાનજન્યો ભ્રમો નાશમેતિ ॥ ૧૪૪॥

સદા દૃશ્યચિન્તોદ્ભવં જીવજાતં
અહંકારતોऽજ્ઞાનતા વિજ્ઞતેऽસ્ય ।
વિવેકાત્ સદા સ્વ-સ્વરૂપં હિ સેવ્યં
ન હિ બ્રહ્મમૂલે જનુર્નૈવ મૃત્યુઃ ॥ ૧૪૫॥

દૃશો ગોચરં યન્ન સત્ તત્કદાચિત્
અકસ્માદ્ ભવેત્ તચ્ચ કાલેન નશ્યેત્ ।

યતઃ સર્વનાશઃ સ્થિરં નૈવ કિંચિત્
મનોઽનન્ત-સત્-ચિત્ સમન્વેષણીયમ્ ॥ ૧૪૬॥

ન ભઙ્ગ્યં ન છેદ્યં ન ચાલ્યં ન ભ્રંશં
સ્થિતં સર્વતોઽહંતયા નૈવ વેદ્યમ્ ।
ન તસ્યૈકરૂપસ્ય દ્વૈતં તુ સહ્યં
મનોઽનન્ત-સત્-ચિત્ સમન્વેષણીયમ્ ॥ ૧૪૭॥

સ્વયંભ્વાદિરૂપેઽપિ યન્નિર્વિકારં
શ્રુતિર્વર્ણને યસ્ય મૌનં પ્રપેદે ।
વિવેકેન તદ્રૂપમાસાદનીયં
મનોઽનન્ત-સત્-ચિત્ સમન્વેષણીયમ્ ॥ ૧૪૮॥

જગત્યાં ન યત્ ચર્મચક્ષુર્નિરીક્ષ્યં
જગત્યાં તુ યદ્ જ્ઞાનચક્ષુર્વિલોક્યમ્ ।
યદાલોકને સ્યાલ્લયો લોકનસ્ય
મનોઽન્વેષણીયં સદાનન્દરૂપમ્ ॥ ૧૪૯॥

ન પીતં ન શુભ્રં ન વા શ્યામમેતત્
ન ચ વ્યક્તમવ્યક્તરૂપં ન નીલમ્ ।
સુવિશ્વાસ આપ્તે તુ મુક્તિપ્રદોઽત્ર
મનોઽન્વેષણીયં સદાનન્દરૂપમ્ ॥ ૧૫૦॥

નૃભિર્વસ્તુ સંચિન્ત્ય સંચિન્ત્ય વેદ્યં
મનો બોધ્ય સંબોધ્ય બુદ્ધં પ્રકાર્યમ્ ।
પરં સંગમાત્ સજ્જનૈઃ સર્વ-સિદ્ધિઃ
વરો નિશ્ચયો જાયતે સાનુરાગાત્ ॥ ૧૫૧॥

કૃતે તત્ત્વસંખ્યાસુ ચાતુર્યયોગેપિ
અવશ્યો પરબ્રહ્મણો હિ પ્રબોધઃ ।
મનઃ સારભૂતં તુ સત્યં વિદૂરે
સમસ્તેષુ તદ્ હ્યેકમેવાદ્વિતીયમ્ ॥ ૧૫૨॥

વિમુષ્ટૈર્ન દેહેન્દ્રિયૈર્નૈવ તત્ત્વૈઃ
સમાધાનતા નૈવ રાગપ્રલાપૈઃ ।
ન યોગૈર્ન યાગૈર્ન વા ત્યાગભોગૈઃ
ભવેત્ સા તુ સઙ્ગાત્ સ્ફુટં સજ્જનાનામ્ ॥ ૧૫૩॥

મહાવાક્યબોધાત્ તથા પઞ્ચકાનાં
વિવૃત્યા પરબ્રહ્મ-દિગ્દર્શનં વૈ ।
દ્વિતીયા-દિને ચન્દ્રસંદર્શનાર્થં
યથા વૃક્ષશાખાઙ્ગુલીર્નિર્દિશન્તિ ॥ ૧૫૪॥

જગત્યાં ન યદ્ દૃશ્યતે તદ્વિલોક્યં
સમાલોચ્યતે ચેત્ તદૈવ સ્ફુટં સ્યાત્ ।
કરે નૈવ તદ્ ગૃહ્યતે યત્નતોऽપિ
ન તત્ સર્વતો વિદ્યમાનં તુ ગમ્યમ્ ॥ ૧૫૫॥

અહં બ્રહ્મ વેદ્મીતિ યો વક્તિ સોऽજ્ઞઃ
ક્ષમસ્તર્કિતું કો જગત્યામ્ અતર્ક્યમ્ ।
અહંતાબલાજ્ જ્ઞાયતે તન્ન મૂઢૈઃ
તદાલોકિતે કોऽસ્તિ તસ્માદ્ વિભિન્નઃ ॥ ૧૫૬॥

શ્રમો નૈકશાસ્ત્રાવલોકેऽસ્ત્યતીવ
પરંત્વેકતા-નિશ્ચયો નૈવ તને ।
વિવાદાત્મકઃ શાસ્ત્રજન્યો વિરોધો
મતિર્લીયતે પ્રત્યુતાऽऽત્મપ્રબોધે ॥ ૧૫૭॥

શ્રુતિઃ શાસ્ત્રષટ્કં તથા ધર્મશાસ્ત્રં
સહસ્રાનનોऽપિ સ્વયં શેષ-નાગઃ ।
અશક્તા હિ તદ્વર્ણને સર્વથેમે
મનો જ્ઞાનદર્પં તતસ્ત્વં વિમુઞ્ચ ॥ ૧૫૮॥

અહન્તાત્મિકા મક્ષિકા ભક્ષિતા ચેદ્
રુચિર્ભોજને તસ્ય પુંસઃ કુતઃ સ્યાત્ ।
અહન્તા હિ હૃત્સ્થા ન યાવત્પ્રયાતિ
સુજીર્ણં ભવેત્ જ્ઞાનમન્નં ન તાવત્ ॥ ૧૫૯॥

મનો માऽસ્તુ વાદે મતિઃ ખેદકર્ત્રી
દ્વૈતે રુચિઃ ક્રોધકર્ત્રી ચ માऽસ્તુ ।
અહંતા મનો યાવદન્તે તવાસ્તે
પરેભ્યો ન હિ જ્ઞાનદાને ત્વમર્હઃ ॥ ૧૬૦॥

અહંતોદયે જાયતે સર્વદુઃખમ્

મુખાદુદ્ગતા જ્ઞાનવાર્તા વૃથૈવ ।
અહંતા-લયે સર્વતસ્તે સુખં સ્યાદ્
અહંતાં સ્વયં તાં મનશ્ચિન્તય ત્વમ્ ॥ ૧૬૧॥

વિવેકેऽપ્યહંતાબલાદ્ યાત્યનીતિમ્
અનીત્યા જનઃ શ્લાઘ્યતાં યાતિ લોકે ।
પરં વેત્તિ ચિત્તે નિજં દમ્ભભાવં
પ્રમાણાન્તરાણ્યસ્ય બુદ્ધિર્જહાતિ ॥ ૧૬૨॥

દૃઢો નિશ્ચયો યસ્ય દેહાત્મબુદ્ધૌ
સુદૂરં હિતાદાત્મનઃ સો નુ યાતઃ ।
પરિત્યજ્ય તાં ચાત્મબુદ્ધિઃ પ્રધાર્યા
સદા સંગતિઃ સજ્જનાનાં વિધેયા ॥ ૧૬૩॥

મનઃ કલ્પિતા દ્વૈતબુદ્ધિઃ પ્રહેયા
પ્રધાર્યા હૃદા કલ્પનાऽદ્વૈતરૂપા ।
સ્વરૂપસ્થિતૌ સાऽપિ યાયાદ્ હૃદન્તાત્
સદા સંગતિઃ સજ્જનાનાં વિધેયા ॥ ૧૬૪॥

પ્રપઞ્ચે સ્વદેહાદિ-સંચિન્તનાત્તુ
મનો વર્ધતે લોભ એતાન્તરે સ્વે ।
અતઃ શ્રીશ-ભક્ત્યા પ્રવૃણ્વીત મુક્તિં
તદર્થં સદા સાધુસંગો વિધેયઃ ॥ ૧૬૫॥

અહંકાર-વિસ્તાર એષોऽસ્તિ દેહ-
પ્રિયા-પુત્ર-મિત્રાદિકો મોહજન્યઃ ।
અતોऽહંભ્રમં જન્મહેતું નિરસ્યેત્
તદર્થં સદા સાધુસઙ્ગં વિદધ્યાત્ ॥ ૧૬૬॥

વરો નિશ્ચયઃ શાશ્વતસ્યૈવ કાર્યો
મનઃ સંશયો દાસવાક્યાદ્ વિસર્જ્યઃ ।
ક્ષણેऽનુક્ષણે જન્મસાર્થક્યમસ્તુ
તદર્થં સદા સાધુસઙ્ગો વિધેયઃ ॥ ૧૬૭॥

પ્રશાન્તાં કરોત્યાત્મવૃત્તિં સ સાધુઃ
દુરાશાશ્રયાદ્ દીનતાં નોપયાતિ ।
ઉપાધિર્હિ દેહાત્મ-ધી-વૃદ્ધિ-કર્ત્રી

કથં સા પ્રબાધેત સાધું વિરાગમ્ ॥ ૧૬૮॥

મનોઽનન્ત-બોધાય સાધું હ્યુપેયાદ્
અહંકાર-વિસ્તારમેતં નિરસ્યેત્ ।
ગુણાતીતતામેત્ય ચિન્ત્યો હ્યનન્તો
ન દેહાત્મબુદ્ધિઃ કદાપીહ કાર્યા ॥ ૧૬૯॥

ત્યજેદાત્મબોધેન દેહાત્મબુદ્ધિં
વિવેકેન સદ્-વસ્તુ-યોગો વિધેયઃ ।
ચિદાકાર-વૃત્તિઃ સ્વતો નૈવભાવ્યા
તતઃ સર્વદા તત્ સમન્વેષણીયમ્ ॥ ૧૭૦॥

સુગુપ્તં સ્થિતં વસ્તુ યત્સારભૂતમ્
ભવેદ્ ગોચરં ચક્ષુષોદૃશ્યમાત્રમ્ ।
અદૃશ્યં ગુણાભાવ-નિર્ભાસમેતદ્
અહંતાબલાન્નૈવ યત્નેઽપિ વેદ્યમ્ ॥ ૧૭૧॥

સ્ફુટા વૈષયી કલ્પના સા ત્વવિદ્યા
યયા બ્રહ્મ વિજ્ઞાયતે સ સુવિદ્યા ।
બભૂવ દ્વિધા સાऽऽદિકલ્પે હિ માયા
વિવેકાદ્ ભવત્યાત્મરૂપે વિલીના ॥ ૧૭૨॥

પ્રવૃત્તે હિ ચિદ્-વ્યોમ્ન્યહંકાર-રાહૌ
ચિદાકાશમાચ્છાદિતં દૃશ્યતે વૈ ।
તમિસ્રાનિશાવદ્ભવેદ્દિગ્ભ્રમોઽપિ
વિવેકાદ્ વિચારાચ્ચ સાક્ષાત્ક્રિયેત્ તત્ ॥ ૧૭૩॥

ન તચ્ચક્ષુષા લક્ષ્યતે યત્નતોઽપિ
ભવે ભક્ષિતે તેન નો તસ્ય રક્ષા ।
યદક્ષય્ય-મોક્ષં દદાત્યક્ષયં તદ્
દયાલુઃ સ્વભક્તસ્ય પક્ષં કરોતિ ॥ ૧૭૪॥

લિખત્યેવ ભાવ્યં વિધિઃ સર્વભાલે
પરં તલ્લલાટેઽસ્તિ કો લેખકર્તા ।
હરઃ સર્વસંહારકોઽસ્ત્યન્તકાલે
પરં શંકરો દહ્યતેઽન્તે ચ કેન ॥ ૧૭૫॥

કૃતા યેન તે દ્વાદશાદિત્યદેવા
અસંખ્યાતશક્રાશ્ચ રુદ્રાસ્તથૈવ ।
અન્વિષ્યમાણઃ સ દેવો ન લભ્યો
ન વિજ્ઞાયતે કીદૃશઃ કોઽસ્તિ મુખ્યઃ ॥ ૧૭૬॥

ન ખણ્ડ્યો ન ભઙ્ગ્યો ભવેદ્ દેવદેવો
ન ચાલ્યો ન નામ્યો ન વૈ દીનકલ્પઃ ।
ન ચાદેયરૂપો ન દૃગ્ગોચરોઽસ્તિ
ન વિજ્ઞાયતેઽહંતયા સર્વગોઽપિ ॥ ૧૭૭॥

પ્રિયો યસ્ય યસ્તસ્ય પૂજ્યઃ સ દેવઃ
પરં વેત્તિ નો દેવદેવં તુ કશ્ચિત્ ।
વસન્ત્યેવ દેવા જગત્યામનન્તા
રતિર્યત્ર તદ્-ભક્તિરેવાઽસ્તિ વર્યા ॥ ૧૭૮॥

ત્રયસ્તે તુ લોકા યતઃ સંબભૂવુઃ
ન તં દેવવર્યં પ્રવક્તીહ કશ્ચિત્ ।
જગત્યાં વરિષ્ઠોઽસ્તિ દેવઃ સુગુપ્તો
વિના સદ્ગુરું નૈવ દૃશ્યઃ કદાચિત્ ॥ ૧૭૯॥

ગુરુત્વે સ્થિતાઃ કોટિશઃ સન્તિ ભૂમૌ
અનેકેષુ મન્ત્રેષુ તન્ત્રેષુ શક્તાઃ ।
સદા કામકામાઃ કથા-ગીત-કારા
નૃણાં ભ્રામકા નૈવ મોક્ષપ્રદાસ્તે ॥ ૧૮૦॥

ન વૈ વઞ્ચકો નાભિચારી ન ચાઢ્યો
ન વા નિન્દકો મત્સરી ભક્તિહીનઃ ।
ન યત્સંગબાધા ન વિત્તાપહારી
જગત્યાં તુ યો બ્રહ્મબોધઃ સ સાધુઃ ॥ ૧૮૧॥

હૃદા કામુકો નિઃસ્પૃહત્વં વદેચ્છેદ્
વિના તત્ક્રિયાં વાક્પટુત્વં વૃથૈવ ।
યથા વક્તિ તાદૃક્ પ્રવૃત્તિર્હિ યસ્ય
મનઃ સદ્ગુરુર્નિશ્ચિતવ્યઃ સ એવ ॥ ૧૮૨॥

જ્ઞાની વિવેકી વિરક્તશ્ચ ભક્તઃ
કૃપાલુર્મનસ્વી ક્ષમી યોગયુક્તઃ ।

સુદક્ષઃ પ્રભુશ્ચાતુરો યશ્ચ વિદ્વાન્
ભવેત્ તસ્ય સઙ્ગે સમાધાન-લાભઃ ॥ ૧૮૩॥

અજં યત્ તથાઽનાગતં ચૈવ યદ્ધિ
વચોભિસ્તુ તજ્જ્ઞાયતે સજ્જનાનામ્ ।
અનિર્વાચ્યમેવાસ્તિ યત્ તચ્ચ વાચ્યં
મનઃ સચ્ચિદાનન્દમન્વેષણીયમ્ ॥ ૧૮૪॥

નિલીનો ભવેદાદરાદ્ રામરૂપે
ભયાતીતતા નિશ્ચિતા સ્વે સ્વરૂપે ।
કદાપ્યેહ નાસાધ્યતે માર્ગ્યમાણઃ
સદૈકં ભવેદ્યન્ન તસ્મિન્ વિભેદઃ ॥ ૧૮૫॥

મનઃ સંનિધૌ તે સદા રાઘવોઽસ્તિ
મનઃ સજ્જન ! માર્ગય ત્વં હિ સત્યમ્ ।
તવાઽખણ્ડિતો રાઘવેણાસ્તિ યોગો
વિનિષ્કાસય સ્વાન્તરાત્ તામહંતામ્ ॥ ૧૮૬॥

મનઃ પિણ્ડ-બ્રહ્માણ્ડયોર્ભૂતસામ્યં
સમસ્તં ત્વિદં બ્રહ્મરૂપે ન કિંચિદ્ ।
મનો ભાતિ યદ્યત્ ન તત્તત્ સદસ્તિ
સુખે સંસ્થિતિઃ સંગમુત્સૃજ્ય કાર્યા ॥ ૧૮૭॥

અહં-પાશમુચ્છિદ્ય વિજ્ઞાન-શસ્ત્રૈઃ
વિદેહસ્થિતિર્ભક્તિતઃ સેવનીયા ।
વિરક્તેર્બલાત્ સર્વનિન્દ્યં વિવર્જ્ય
સુખે સંસ્થિતિઃ સઙ્ગમુત્સૃજ્ય કાર્યા ॥ ૧૮૮॥

પૃથિવ્યાદિકૃદ્ દેવ આલોકનીયો
યદાલોકને મુક્તિલાભોઽસ્તિ સદ્યઃ ।
ગુણૈઃ સંયુતો નિર્ગુણ સેવનીયઃ
સુખે સંસ્થિતિઃ સઙ્ગમુત્સૃજ્ય કાર્યા ॥ ૧૮૯॥

સ નો કાર્યકર્તા ન વા સૃષ્ટિભર્તા
પરાયાઃ પરો નો વિવર્તેન લિપ્તઃ ।
સ વૈ નિર્વિકલ્પો વિકલ્પ્યૈવ સેવ્યઃ
પરિત્યજ્ય સઙ્ગં સુખં સ્થેયમત્ર ॥ ૧૯૦॥

ન દેહાત્મધી-નિશ્ચયો યસ્ય નષ્ટો
ન કલ્પાન્તકાલેઽપિ સ જ્ઞાનવાન્ સ્યાત્ ।
પરં બ્રહ્મ નોઽહંતયા વેત્તિ કશ્ચિદ્
મનોઽજ્ઞાનજાં શૂન્યતાં નો જહાતિ ॥ ૧૯૧॥

મનઃસ્પર્શહીનં સ્થિરં યત્સ્વરૂપં
અભેદેન ચિન્ત્યં હિ સર્વોત્તમસ્ય ।
ન દૃષ્ટાન્તયોગ્યં ભવેત્ તસ્ય કિંચિદ્
ન નિઃસંગતા સંગતા તત્ર સત્યા ॥ ૧૯૨॥

પરેશે ન વિજ્ઞાતતાઽજ્ઞાતતા વા
સ નો વર્ણ્યતે વેદશાસ્ત્રૈઃ પુરાણૈઃ ।
અદૃશ્યો ન દૃશ્યો ન સાક્ષી તયોર્વા
શ્રુતિર્યસ્ય નાન્તં વિજાનાતિ નૈવ ॥ ૧૯૩॥

હૃદિસ્થોઽસ્તિ કઃ કીદૃશો દેવવર્યો
ગુરુઃ સાદરં સાધકેનાઽથ પૃષ્ટઃ ।
પરિત્યજ્ય દેહં વસત્યેષ કુત્ર
પ્રવાસયોગ્યં ક્વ સંસ્થાનમસ્ય ॥ ૧૯૪॥

ઇતિ પ્રાહ જાનીહિ દેવો હિ હૃત્સ્થો
નભોવત્સદા વ્યાપકોઽપ્યપ્રલિપ્તઃ ।
ન ગચ્છત્યથો નોપગચ્છત્યજસ્રં
ઋતે તેન રિક્તં સ્થલં નૈવ કિંચિત્ ॥ ૧૯૫॥

નભોવિભ્રમદ્-રેણુમાત્રં સ્થલં નો
રઘૂણામધીશેન રિક્તં વિભાતિ ।
પ્રવૃત્તો હિ તદ્દર્શને યઃ સ તસ્મિન્
લયં યાત્યલક્ષ્યં ચ લક્ષ્યં ચ લીનમ્ ॥ ૧૯૬॥

નભોવદ્ધિ તદ્ વ્યાપકં રામરૂપં
હૃદા ચિન્તિતં સ્યાદ્ ભવભ્રંશહેતુઃ ।
વિલીના ભવેદ્દેહધીસ્તસ્ય બોધાદ્
યથેચ્છં સુદૃષ્ટેઽપિ તૃપ્તિસ્તુ નાસ્તિ ॥ ૧૯૭॥

નભઃ સંસ્થિતં વ્યાપ્ય વિશ્વં યથેદં

તથા રામ ઇત્થં ન સામ્યં કથંચિત્ ।
સ ચાસ્ત્યદ્વિતીયઃ સ્વભાવાદ્ હિ રામઃ
તદર્થં હિ વ્યર્થં પદં વ્યાપકેતિ ॥ ૧૯૮॥

પુરાણં તતં સર્વતો યત્સ્વરૂપં
ન તર્કસ્ય લેશોઽપિ યસ્મિન્વિધેયઃ ।
નિગૂઢં પરંત્વાશુ તત્સ્યાત્સુગમ્યં
પ્રતાપાદ્ ગુરોરદ્વિતીયેતિસંજ્ઞમ્ ॥ ૧૯૯॥

સ્વરૂપં તુ યજ્જ્ઞાયતે જ્ઞાનયોગાત્
સ્ફુટ સાક્ષિતાઽન્તર્હિતા તત્ર સર્વા ।
ભવેદુન્મની કુણ્ઠિતા વાક્ય સદ્યઃ
સ એવ સ્વયં રામદૃક્ સર્વતો યઃ ॥ ૨૦૦॥

કદાપ્યાત્મબોધે દ્વિતીયં ન ભાતિ
ન વૈ માનસે દ્વૈતલેશોઽસ્તિ કિંચિત્ ।
ગતૈર્જન્મસંઘૈઃ સ્વરૂપોપલબ્ધિઃ
વિદેહસ્થિતૌ સર્વ-કાયા-નિરાસઃ ॥ ૨૦૧॥

મનો યત્સુગુહ્યં ત્વયા તદ્ધિ લબ્ધં
પ્રકાર્યસ્ત્વયા રક્ષણે તસ્ય યત્નઃ ।
દૃઢપ્રત્યયાર્થં સદા શ્રાવ્યમેતન્
મનઃ સાધુસંગાદ્ધિ ધન્યત્વમેષિ ॥ ૨૦૨॥

મનઃ સર્વસંગં પરિત્યજ્ય દૂરાદ્
વિધેયઃ સદા સાદરં સાધુસઙ્ગઃ ।
મહાદુઃખભઙ્ગઃ સતાં સંગમેન
વિના સાધનં તેન સન્માર્ગલાભઃ ॥ ૨૦૩॥

મના સર્વ સઙ્ગાપહઃ સાધુસઙ્ગો
મનસ્તત્ક્ષણં મોક્ષદઃ સંગમૈષઃ ।
મનઃ સાધકાન્ મોચયત્યેષ શીઘ્રં
મનઃ સર્વથા દ્વૈતનાશક્ષમોઽયમ્ ॥ ૨૦૪॥

મનોબોધમાકર્ણ્ય દોષાઃ પ્રયાન્તિ
જડાઃ સાધના-યોગ્યતાં ચોપયાન્તિ ।
તતો જ્ઞાનવૈરાગ્યસામર્થ્યલાભો

વિમુક્તિસ્તતો દાસવાક્યપ્રતીત્યા ॥ ૨૦૫॥

॥ જય જય રઘુવીર સમર્થ ॥

ગુણાભ્રાઙ્કુશીતાંશુભિઃ સંમિતેઽબ્દે
તતશ્ચૈત્રશુક્લેઽર્કવારે નવમ્યામ્ ।
મનોબોધમેનં તપત્યાસ્તટસ્થો
ગુરો રામદાસસ્ય દાસશ્ચકાર ॥

પરં નોઽખિલં તદ્યથાર્થપ્રકાશં
સદોષં પુનર્મુદ્રણં ચાપ્યયુક્તમ્ ।
અતઃ શ્રીસમર્થૈરનુપ્રેરિતેન
સમગ્રં સુસંશોધિતં પ્રીતયેઽસ્તુ ॥

આપદામપહર્તારં દાતારં સર્વસમ્પદામ્ ।
લોકાભિરામં શ્રીરામં ભૂયો ભૂયો નમામ્યહમ્ ॥

॥ શ્રી રામ જય રામ જય જય રામ ॥

translation of Samarth Ramdas's manAche shloka
from marAthI to sanskrit by shrI dAsAnudAsa

*manobodhaH*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*